॥ শম্ভু স্তোত্র ॥

নানাযোনিসহস্রকোটিষু মুহুঃ সংভূয সংভূয তদ-
গরভাৰাসনিরন্তদুঃখনিৰহং ৰক্তুং ন শক্যং চ তত .
ভূযো ভূয ইহানুভূয সুতরাং কষ্টানি নষ্টোস্ম্যহং
ত্রাহি ত্ৰং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ১ ..
বাল্যে তাডনপীডনৈরবহুৰিধৈঃ পিত্রাদিভিরেবাধিতঃ
তত্কালোচিতরোগজালজনিতৈরদুঃখৈরলং বাধিতঃ .
লীলালৌল্যগুণীকৃতৈশ্চ ৰিৰিধৈরদুশ্চোষ্টিতৈঃ ক্লেশিতঃ
সোহং ত্ৰাং শরণং ৰরজাম্যৰ ৰিভো শংভো দযাম্ভোনিধে .. ২ ..
তারুণ্যে মদনেন পীডিততনুঃ কামাতুরঃ কামিনী-
সক্তস্তদ্ৰশগঃ স্ৰধরমৰিমুখঃ সদ্ভিঃ সদা দুষিতঃ .
করমাকারষমপারনারকফলং সৌখ্যাশযা দুরমতিঃ
ত্রাহি ত্ৰং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ৩ ..
ৰৃদ্ধত্ৰে গলিতাখিলেন্দ্রিযবলো ৰিভ্রষ্টদন্তাৰলিঃ
শ্ৰেতীভূতশিরাঃ সুজরজরতনুঃ কম্পাশ্রযোনাশ্রযঃ .
লালোচ্ছিষ্টপুরীষমুত্রসলিলক্লিন্নোস্মি দীনোস্ম্যহং
ত্রাহি ত্ৰং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ৪ ..
ধ্যাতং তে পদাম্বুজং সকৃদপি ধ্যাতং ধনং সরৰদা
পুজা তে ন কৃতা কৃতা স্ৰৰপুষঃ স্ত্রগ্গন্ধলেপারচনৈঃ .
নান্নাদ্যৈঃ পরিতরিপতা দ্ৰিজৰরা জিহৈৰৰ সংতরিপতা
পাপিষ্ঠেন মযা সদাশিৰ ৰিভো শংভো দযাম্ভোনিধে .. ৫ ..
সংধ্যাস্নানজপাদি করম ন কৃতং ভক্ত্যা কৃতং দুষ্কৃতং
ত্ৰন্নামেশ ন কীরিততং ত্ৰতিমুদা দুরভাষিতং ভাষিতম .
ত্ৰন্মুরিতরন ৰিলোকিতা পুনরপি স্ত্রীমুরিতরালোকিতা
ভোগাসক্তিমতা মযা শিৰ ৰিভো শংভো দযাম্ভোনিধে .. ৬ ..
সংধ্যাধ্যানজপাদিকরমকরণে শক্তোস্মি নৈৰ প্রভো

দাতুং হন্ত মতিং প্রতীপকরণে দারাদিবন্ধাস্পদে .
নামৈকং তৱ তারকং মম ৱিভো হ্যন্যন্ন চাস্তি ক্ৱচিত
ত্রাহি ত্ৱং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ৭ ..
কুম্ভীপাকধুরংধরাদিষু মহাবীজাদিষু প্রোদ্দ্ধতং
ঘোরং নারকদুঃখমীষদপি ৱা সোঢুং ন শক্তোঽস্ম্যহম .
তস্মাত ত্ৱাং শরণং ৱ্রজামি সততং জানামি ন ত্ৱাং ৱিনা
ত্রাহি ত্ৱং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ৮ ..
মাতা ৱাপি পিতা সুতোপি ন হিতো ভ্রাত্রাদযো বান্ধৱাঃ
সর্ৱে স্ৱারথপরা ভৱন্তি খলু মাং ত্রাতুং ন কেপি ক্ষমাঃ .
দূতেভ্যো যমচোদিতেভ্য ইহ তু ত্ৱামন্তরা শংকর
ত্রাহি ত্ৱং করুণাতরঙ্গিতদৃশা শংভো দযাম্ভোনিধে .. ৯ ..
.. শংভুস্তোত্রং সংপূরণম ..

---

Encoded by Sridhar Seshagiri seshagir@egr.msu.edu

---

Please send corrections to sanskrit@cheerful.com